# .. hArItagItA ..

# ॥ हारीतगीता ॥

अध्यायः २६९

य्

किं शीलः किं समाचारः किं विद्यः किं परायनः ।
प्राप्नोति ब्रह्मणः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ १॥

भी

मोक्षधर्मेषु निरतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥ २॥
स्वगृहादभिनिःसृत्य लाभालाभे समो मुनिः ।
समुपोधेषु कामेषु निरपेक्षः परिव्रजेत् ॥ ३॥
न चक्षुषा न मनसा न वाचा दूसयेदपि ।
न प्रत्यक्षं परोक्षं वा दूसनं व्याहरेत्क्व चित् ॥ ४॥
न हिंस्यात्सर्वभूतानि मैत्रायण गतिश् चरेत् ।
नेदं जीवितमासाद्य वैरं कुर्वीत केन चित् ॥ ५॥
अतिवादांस्तितिक्षेत नाभिमन्येत्कथं चन ।
क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदेत् ॥ ६॥
प्रदक्षिणं प्रसव्यं च ग्राममध्ये न चाचरेत् ।
भैक्ष चर्यामनापन्नो न गच्छेत्पूर्वकेतितः ॥ ७॥
अविकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत् ।
मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादरोषणः ॥ ८॥
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीते पात्रसञ्चारे भिक्षां लिप्सेत वै मुनिः ॥ ९॥
अनुयात्रिकमर्थस्य मात्रा लाभेष्वनादृतः ।
अलाभे न विहन्येत लाभश्चैनं न हर्षयेत् ॥ १०॥
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ।
अभिपूजित लाभं हि जुगुप्सेतैव तादृशः ॥ ११॥
न चान्न दोषान्निन्देत न गुणानभिपूजयेत् ।
शयासने विविक्ते च नित्यमेवाभिपूजयेत् ॥ १२॥
शून्यागरं वृक्षमूलमरण्यमथ वा गुहाम् ।
अज्ञातचर्यां गत्वान्यां ततोऽन्यत्रैव संविशेत् ॥ १३॥
अनुरोध विरोधाभ्यां समः स्यादचलो ध्रुवः ।
सुकृतं दुष्कृतं चोभे नानुरुध्येत कर्मणि ॥ १४॥
वाचो वेगं मनसः क्रोधवेगं

विवित्सा वेगमुदरोपस्थ वेगम् ।
एतान्वेगान्विनयेद्वै तपस्वी
निन्दा चास्य हृदयं नोपहन्यात् ॥ १५ ॥
मध्यस्थ एव तिष्ठेत प्रशंसा निन्दयोः समः ।
एतत्पवित्रं परमं परिव्राजक आश्रमे ॥ १६ ॥
महात्मा सुव्रतो दान्तः सर्वत्रैवानपाश्रितः ।
अपूर्व चारकः सौम्यो अनिकेतः समाहितः ॥ १७ ॥
वान प्रस्थगृहस्थाभ्यां न संसृज्येत कर्हि चित् ।
अज्ञातलिप्सां लिप्सेत न चैनं हर्ष आविशेत् ॥ १८ ॥
विजानतां मोक्ष एष श्रमः स्यादविजानताम् ।
मोक्षयानमिदं कृत्स्नं विदुषां हारितोऽब्रवीत् ॥ १९ ॥
अभयं सर्वभूतेभ्यो दत्त्वा यः प्रव्रजेद्गृहात् ।
लोकास्तेजोमयास्तस्य तथानन्त्याय कल्पते ॥ २० ॥

॥ इति हारीतगीता समाप्ता ॥

Adhyaya number 269 in shAntiparva, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition it is 278.

Sunder Hattangadi (sunderh at hotmail.com)

---

Please send corrections to sanskrit@cheerful.com
Last updated October 3, 2010
http://sanskritdocuments.org